*Siddhanta's International Journal of Advanced Research in Arts & Humanities*
*Vol. 3, No. 3, January – February 2026*

# दूतकाव्यस्य वैशिष्ट्यम्

*Dr. Dilip Kumar Das*
*Classical Teacher, Town Government Girls High School, Bhawanipatna, Kalahandi, Odisha, India*

**"वाक्यं रसात्मकं काव्यम्[i]"** इति साहित्यदर्पणे । काव्यं द्विविधं, दृश्यं श्रव्यं च । श्रव्यकाव्यस्य पुनः विभाजनं क्रियते गद्य, पद्य एवं चम्पू। पद्यकाव्यस्य पुनः भेदद्वयं वर्तते यथा महाकाव्यं खण्डकाव्यं च । खण्डकाव्यं गीतिकाव्यं दूतकाव्यनामां च ख्याता ।

**दूतकाव्यस्योत्पत्तिः**

उपलभ्यमानेषु दूतकाव्येषु कालिदासकृतं मेघदूतमेव प्राचीनतमं रचनापटुतया प्रधानतममेव पदमध्यास्ते सुरभारत्यामिति तु निर्विवादमेव । महाकविना कालिदासेन चेदृशकाव्यनिर्माणकल्पना स्वयमेव उद्भाविता पुराणादिषूपवर्णितादाख्यानाद् ग्रन्थान्तराद् वा समाधिगता इत्यत्र विषये न किमपि पार्यते प्रतिपादयितुं निःसंशयम् । परं कालिदासात् प्राक्तनेऽपि काले अचेतनानं दूतत्वं कल्पितमेव । तथा च ऋग्वेदे पणीनां सविधे कुक्कुररुपायाः सरमाया दूतिरूपेण प्रेषणमुपनिबद्धम् । 'साम' पदस्य अन्यनाम संगीतं इत्युच्यते । ततः सामवेदं सम्पूर्णरूपेण गीतिकाव्यमिति अङ्गीक्रियते । अस्य वेदस्य सांगीतिक मूर्छनया सानन्दभूत्वा भगवान् सर्वेषु वेदः इति प्रतिपाद्यते यथा 'वेदानां सामवेदोऽस्मि' ।

महाभारते च नलसकाशादागतं राजहसं दमयन्ती नलं सविधे प्रेषितवतीति उपवर्णितम् । रामायणे च रामेण सीतान्तिके दूतस्य हनुमतः प्रेषणं समुपनिबद्धम् । एतावता प्रतिभाति यथा कालिदासात् पूर्वमपि केचन चेतनावतां जन्तुनामचेतनानां वा वस्तुना दूतत्वं कल्पितवन्तः । एतेभ्य एव कालिदासेन दूतकाव्यप्रणयनप्रवृत्तिरासादितो न वेति न प्रतिपादयितुमीशाः केऽपि । परं सीतां प्रति रामस्य हनुमत्संदेशं मनसि निधाय मेघसन्देशः कविः कृतवान् इत्याहुरिति मल्लिनाथेन मेघदूताद्यश्लोकटीकायाम् उपन्यस्तमिति हनुमतो दौत्यमेव मेघदूतत्वकल्पने निदानमिति प्रचीनानां मनमिति स्फुटम् । 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा[ii] इति मेघदूतवचनमप्येतदेव मतमनुकूलयतीवेति प्रतीयते ।

दूतकाव्यमूलभूतानामिव प्राचीनप्राचीनानां रामायणमहाभारतोपवर्णितानां रामदमयन्तीप्रेषितानां हनुमत् हंसानां दौत्यमुपाश्रित्य न केनाप्यर्वाचीनेंन कविना दूतकाव्यं किञ्चिदपि।ग्रधितमस्माभिरिदानीमप्युपलब्धम् । विषयान्तराणामितरेषां बहूनामपि दूतकाव्यावलम्बनभूतत्वे ईदृशाणां रमणीयविषयाणामुपेक्षणीयत्वे न कारणः किमप्युत्पश्यामः ।

साहित्यदर्पणे उल्लेखः अस्ति - "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि यत्[iii]" (साहित्यदर्पण-सप्तमः परिच्छेदः श्लोक संख्या ३२१)। काव्ये नायकनायिकौ नाम ख्यात तथा नायक तु उच्चवंशीय भवेत् इति विधीयते, परन्तु खण्डकाव्ये एतद् लक्षणं विपरिणमते उदाहरणं मेघदूतम् । काव्यस्य कथावस्तु प्रसिद्धम् तथा ऐतिहासिकम् इति निर्धारितं यथा कालिदासेन विरचितं रघुवंश कुमारसम्भव च । किन्तु खण्डकाव्यम् एतद् नियमबद्धं न ।

"सर्गबन्धं महाकाव्यं तत्रैकनायकः शूरः[iv]" (साहत्यिदर्पणे) इति महाकाव्यस्य लक्षणं खण्डकाव्ये विपर्ययं परिदृश्यते, तथापि रसविप्रलम्भशृङ्गारयोः अति उत्तमपेण सन्निवेष्टितं भवति । उल्लेखितकारणानि खण्डकाव्यं सम्पूर्णतया काव्यमिति न परिगण्यते ।

अधुना खण्डकाव्यस्य लक्षणं निरूप्यते ।

**संक्षिप्तकरणम्-**

संक्षिप्तकरणं खण्डकाव्यस्यैकं विशेषत्वम् । काव्येषु खण्डकाव्यस्य आकारविषयञ्च अतिलघु भवति । उदाहरणं मेघूदतम् ।

**भावप्रवणता-**

भावप्रवणता खण्डकाव्यस्य अपरं वैशिष्ट्यम् । कविना खण्डकाव्ये अतिगभीरभावप्रवणभावेन प्रकाश्यते । तथैव मेघदूते कान्ताविरहयक्षः मेघं सन्निकटे भावप्रवणतारूपेण व्याकुलं निवेदनं चकार ।

**अनुभव अभिमतश्च सादृश्यम्-**

आलङ्कारिकारमतेन अनुभवस्य कारणम् विभाव इति उच्यते । अनुभवः सुखं वा दुःखं भवेत् । तत्तु विभावस्य स्वरूपे निर्भरशीलम् । यथा वाल्मीकेः अनुभवे सुखदुःखानुभूतिश्च सम्मिश्र प्रकटितम् – " मा निषाद प्रतिष्ठां त्वमगमश्शाश्वतीस्समा: ।

यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम् इत्यादि[v]" गाने । एतानि सर्वाणि गीतिकाव्य मुख्यलक्षणम् । एतद् विना काव्यस्य काव्यत्वं विनष्टं भवति, यत् द्वारा काव्यं हृदयस्पर्शि मार्मिक प्रतीयते ।

**रससंश्लिष्टता-**

रसस्य संयोजना तु गीतिकाव्यस्य अन्यतम प्रमुख विशेषत्वम् । साधरणतः विप्रलम्भो तथा सम्भोगशृङ्गार एव प्रयोगेण गीतिकाव्यस्य रसमोदकतां प्राबल्यं भवति । शृङ्गाररसप्रतिपादने मार्मिकत्वं हृदयस्पर्शि भवति ।

**गेयता-**

एतद् तु गीतिकाव्यस्य प्रमुख लक्षणम् अभिव्यंजते। गीतिकाव्यं मन्दाक्रान्ताछन्देन गेयते। तत्तु गानमयं भवेत्।

**प्रकृतिचित्रणम्-**

प्रकृतिचित्रणं काव्यस्य सामान्यभूतं लक्षणम्। गीतिकाव्ये प्रकृतिचित्रणम् अतीव निखुणभावे वर्णितम्। यथा मेघदूते महाकविकालिदासस्य प्रकृतिवर्णना रमणीयता भवति।

**मेघदूतम् एकं खण्डकाव्यम्-**

मेघदूते नायकनायिकयोः नाम-उल्लेखः नास्ति। काव्ये तु महाकुलीन इति विधीयते परन्तु यक्ष एकः साधारण मनुष्यरूपेण स्थितः। संक्षेपतः अस्मिन् काव्ये लक्षणादिकं दृश्यते तानि यक्षस्य निकटे न परिदृश्यते। महाकाव्ये सर्गविभाजनं क्रियते, तत्तु मेघदूते विपर्ययं प्रतीयते तथापि मेघदूते रसविप्रलम्भशृङ्गारयोः सन्निवेष्टितम् भवति। अतः काव्येदं मुख्यविभाग परिपूरयति अपि सम्पूर्णलक्षणं न अङ्गीक्रियते। तदर्थं मेघदूतमेकं खण्डकाव्यं इति उच्यते। यतः विश्वनाथविरचितसाहित्यदर्पणानुसारेण खण्डकाव्यस्य लक्षणम् "खण्डकाव्यं भवेत् काव्यस्येकदेशानुसारि यत्[vi]" इति।

**मेघदूतम् एकं गीतिकाव्यम्-**

संस्कृतवाङ्मये समालोचकैः मेघदूतं खण्डकाव्यमिति उच्यते अपितु गीतिकाव्यं दूतकाव्यं च स्वीक्रियते। 'प्रावृट्प्रवासव्यसने मन्दाक्रान्ता विराजते' गीतिकाव्ये मन्दाक्रान्ताप्रविलासितेन करुणरस सञ्जातं तथैव जयदेवकृतं गीतगोविन्दं संगीतोपयोगि एकं गीतिकाव्यम्। आकृतिविषयञ्च संक्षिप्ततया मेघदूतम् एकं गीतिकाव्यम्। अस्मिन् काव्ये यक्षस्य मेघं सविधे व्याकुलं निवेदनं भावप्रवणतारूपेण प्रकटीयते। एतानि सर्वाणि लक्षणानि मेघदूतम् एकं गीतिकाव्यमिति निष्पद्यते। मेघदूते नदी पर्वत नगर इत्यादिना चित्रणं सरलं तथा प्राञ्जललभावेन प्रदर्श्यते। तदर्थं कालिदासकृतः मेघदूतं गीतिकाव्यरूपे प्रसिद्धम्।

**मेघदूतम् एकं दूतकाव्यम्-**

पुनः मेघदूतम् अपि दूतकाव्यमिति परिगण्यते तर्हि किमर्थं दूतकाव्यम् ? अत्र कान्ताविरहितयक्षेन मेघं दूतरूपेण तस्य नायिकां प्रति संन्देशं प्रेष्यते। उत्तरमेघे वर्णितम् "इत्याख्याते पवनतनयं मैथिलीवोन्मुखि सा[vii] तदर्थं मेघदूतम् संन्देशकाव्यमपि कथ्यते। मेघदूतम् अनुश्रृत्य बहूनि दूतकाव्यानि विरचितानि। तन्मध्येषु हससन्देशः, नेमिदूतः, वायुदूतः, उद्धवदूतः, हनुमत्दूतः इत्यादि अन्यतमाः।

कालिदासेन प्राक् विश्वसाहित्ये अचेतनः निर्जीवः तथा जड 'मेघं', दूतरूपेण कल्प्यते। परन्तु आलंकारिकः भामहः उत्थापयति, निर्जीवः मेघः संदेशवाहकः कथमिति भविष्यति। यः वाक्शक्त्याविहीनः, परं प्रति भावव्यक्ते असमर्थः, निकषामपि न उपलभ्यमानः, तेषां दूतयोग्यता कथम् आगच्छति। भामह अभिमते –

अवाचोऽव्यक्तवचश्च दूरदेशविचारिणः
कथं दौत्यं प्रपद्येरन् इति युक्त्या न युज्यते[viii] ॥

विश्वकवि कालिदासस्य 'कमार्तः हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इति प्रसिद्धवाक्यम् उधृत्य आलंकारिकभामहः अस्य प्रश्नस्य समाधानं दीयते यथा –

यदि चोत्कण्ठया यत्तद् उन्मत्तेव भाषते।
तथा भवतु भून्मेदं सुमेधोभिः प्रयुज्यते[ix] ॥

अर्थात् प्रेषकः यदि उत्कण्ठितो भवति तर्हि चेतनं वा अचेतनं दूतरूपेण प्रेषयित्वा किञ्चिदपि दोषं न क्रियते। मेघदूते चित्रितं यक्षः संपूर्णरूपे तु कान्ताविरहितेन विव्रतमेव। ततः अचेतनपि तस्य दृष्ट्या चेतनमेव प्रतीयते। अपरं च कालिदासस्य प्रकृतिचित्रणमपि प्राणस्पर्शी वा जीवन्तं भवति। एतद् तु निर्जीवमेघं दूतरूपेण प्रेषणं परिकल्पनाय स्पष्टम् अनुमीयते।

सन्दर्भाः ग्रन्थसूची-

1. भामह, श्री। *काव्यालङ्कारः*. बालमनोरमा प्रेसः, 1956.
2. कालिदासः। *मेघदूतम्: सौदामनी च*. सम्पा. सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भण्डारः, 2005.
3. महापात्र, गोपीनाथ। *संस्कृतसाहित्यस्य इतिहासः*. नालन्दा, 2010.
4. मीमांसक, युधिष्ठिर। *संस्कृतव्याकरणस्य इतिहासः*. रामकपूर ट्रस्ट्.
5. सतपथी, एच्. के. *संस्कृतसाहित्यस्य इतिहासः*. किताब महल्, 2015.
6. शतपथी, हरेकृष्ण। *संस्कृत साहित्यस्य इतिहासः*. किताब महल्, 2008.
7. वाल्मीकि। *रामायणम्: किष्किन्ध्याकाण्डम्*. सम्पा. द्वारकाप्रसाद चतुर्वेदी, रामनारायण लाल, 1927.
8. विश्वनाथकविराजः। *साहित्यदर्पणम्*. चन्द्रकला संस्कृत-हिन्दी व्याख्योपेतम्, चौखम्बा कृष्णदास अकादमी, 2019.

[i] साहित्यदर्पणम्- प्रथमः परिच्छेदः, 2 गद्यभागः
[ii] मेघदूतम्, पूर्वसन्देशः 1 गद्यभागः
[iii] साहित्यदर्पणम् सप्तमः परिच्छेदः, श्लोकसंख्या- 321
[iv] साहित्यदर्पणम् सूत्र 6.315
[v] रामायणम् 1.2.15
[vi] साहित्यदर्पणम् सप्तमः परिच्छेदः, श्लोकसंख्या- 321
[vii] मेघदूतम्, पूर्वसन्देशः 1 गद्यभागः
[viii] काव्यालंकारः 1/43
[ix] काव्यालङ्कारः 1/44